International Journal of Multidisciplinary Horizon

ISSN:**3049-2017**
IJMH 2025; 2(5): 143-148
© 2025 IJMH
www.themultijournal.com

Received: 15-10-2025
Accepted: 27-10-2025
Publish : 28-10-2025

**श्रीकान्त विश्वास**
शोधछात्रः,अद्वैतवेदान्तविभागः,
राष्टियसंस्कृतविश्वविद्यालयः,
तिरुपति

**Correspondence:**
**श्रीकान्त विश्वास**
शोधछात्रः,अद्वैतवेदान्तविभागः,
राष्टियसंस्कृतविश्वविद्यालयः,
तिरुपति

# अद्वैतवेदान्ते मोक्षस्य स्वरूपम्

**श्रीकान्त विश्वास**

**शोधसारः(Abstact) –**

सुविदितमेवैतत् यत् सर्वेषां आस्तिकदर्शनानां प्रादुर्भावः तत्वज्ञानमुद्दिश्यैव भवतीति। ज्ञानिनः हि करुणालवः सर्वेषां अन्येषां अपि तादृशमेव तत्वज्ञानं जायताम्, यादृशं मम जातमिति मन्यमानाः तत् तत् दर्शनं उपदिशन् इति श्लिष्यते। अन्यथा तत् प्रणयनवैयर्थ्यापत्तेः। नहि पामरकरुणां विना ज्ञानिनां उपदेशे अन्यः हेतुः अस्ति। श्रुत्यापि अयमर्थः अवगम्यते।

**तस्मै सः विद्वानुपसन्नाय सम्यक्**
**प्रशान्तचित्ताय समन्विताय।**
**येनाक्षरं पुरुषं वेद सत्यं**
**प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् ।।**[1]

इत्येवं मन्त्रः ज्ञानिनां योग्यायोपदेशं द्योतयति। स्मृतिरपि **"उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनः तत्वदर्शिनः।"**[2] इत्येतमर्थमुपद्बलयति। सम्प्रदायप्रवर्तनस्य अपेक्षितत्वात् अपि उपदेशावश्यकता प्रविज्ञायते। **"अन्यथा हि इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे"**[3] इति श्रुत्यर्थः सम्यक् नोपपन्नः स्यात् । आगमसम्प्रदायस्य ज्ञातस्य उपदेशं विना श्रवणासम्भवात् ।

यद्यपि अयं उपदेशः ज्ञानिनां करुणापूर्वकः तज्जनकः च इति स्थितम्, तथापि उपदेशानां परस्परं मतिविरोधः दृश्यते। तत्र कारणं किमिति अन्वेष्टुं पामराः वयं न शक्ताः । एकस्यैव तत्वज्ञानिनः ज्ञानं समीचीनं अन्यस्य तु न तथा इति वक्तुं नास्माकं सार्थमस्ति।

सम्प्रदायानुसारिणः वयं तं तं सम्पदायमनुसृत्य कामं आचार्यम् एकं तत्वज्ञानिनम् अभ्युपगच्छामः, तथापि इतरान् अतत्वज्ञानिनः वक्तुं नास्माकं तत्वज्ञानं समस्ति। अतः अस्माकमभीष्टः आचार्यः तत्वज्ञानी इत्येतावत् अर्थ समवसिता अस्माकं श्रद्धा कर्तुं युक्ता।

विशिष्य आगमार्थसम्प्रदायप्रवर्तकेषु आचार्येषु श्रुत्यर्थतात्पर्य प्रति विप्रतिपन्नेषु नास्माकं सहसाबुद्धिः एकान्ततः गच्छेत्। तयोः एकतरस्यैव सिद्धान्तः समीचीनां रीतिं अध्यास्ते नान्यस्य इति वक्तुं नास्माकं मतिः क्षमा। उक्तः च अयमर्थः अस्मिन्नाभाणके -

**गौतमः यदि सर्वज्ञः कणादः नेति का प्रमा।**
**तावुभौ यदि सर्वज्ञौ मतभेदः कथं तयोः ।। इति।**

अनेन च प्रसिद्धेन आभानकेन प्रश्नः क्रियते नतु एकतरस्यापि अप्रामाण्यं युक्तं इति बोधयति। ततश्च सम्मदायप्रवर्तकेषु आचार्येषु एकतरस्यापि अप्रामाण्यं निश्चेतुं नास्माकं मतिदार्ढ्यमस्ति। उभयोः प्रामाण्यं च विरुद्धार्थप्रतिपादकयोः तदंशेन सम्भवतीति नैव वक्तव्यम्। अतः एकतरपक्षाप्रामाण्यकथां विना आचार्याणां सर्वेषामपि पक्षज्ञानं कर्तुं समुचितं भवति।

तथा समुचितरीत्या एव अद्वैतमार्गप्रवर्तकानां श्रीशङ्कराचार्याणां विशिष्टाद्वैतप्रवर्तकानां श्रीरामानुजा-चार्याणां च मतं परिचयार्थं परिशीलयितुं यत्नः क्रियते। तत्रापि मोक्षस्वरूपतल्लक्षणतत्प्रमाण-तत्प्राप्ति-तत्प्रपञ्चादि विषये आचार्याणां उभयेषां अभिप्रायः सभक्तिश्रद्धं परिशील्यते।

- **तत्त्वज्ञानम् -**

स्वस्वरूपावस्थानं मोक्ष इति आचार्यस्य मतम्। **"स्वात्मन्यवस्थानं मोक्ष"**[4]इति। मोक्षस्वरूपविषये आचार्यैरुच्यते "इदं तु पारमार्थिकं, कूटस्थं, नित्यं, व्योमवत् सर्वव्यापि, सर्वविक्रियारहितम्, नित्यतृप्तं, निरवयवं, स्वयंज्योतिस्वभावं, यत्र धर्माधर्मौ सह कार्येण कालत्रयं च नोपवर्तन्ते तदु अशरीरं **मोक्षाख्यम्"**[5] इति। वेदान्तशास्त्रस्य परमं प्रयोजनं स्वमलिनावरणपरित्यागेन शुद्धानिर्वनीयस्वस्वरूप-ज्ञानोद्भावनम् । संसारसागरस्यातिक्रमणमेव अस्य मूललक्ष्यमस्ति।

संसारस्य वर्णनमाचार्येण क्रियते संसारसमुद्रे महत्यविद्याकामक्रमप्रभदुःखोदके तीव्ररोगजरामृत्युमोहा-ग्राहेऽनादावनन्ते अपारे निरालम्बे विषयेन्द्रियजनितसुखलवक्षणविश्रामे पञ्चेन्द्रियार्थतृष्णमारुतविकषो-भोत्थितानर्थशतमोर्मौ महारौरवाद्य-नेकनिरयगतहाहेत्यादिकूजिताक्रोशनोद्भुतमहारवेसत्यार्जवदानदया

हिंसाशमद-मधृत्याद्या - त्मगुणपाथेय-ज्ञानोदुपे सत्सङ्गसर्वत्यागमार्गे मोक्षतीरे एतस्मिन्महत्यर्णवे प्रापतन्पतितवत्यः, ततः उद्धारार्थं वेदान्त उपनिषद् वा। तज्ज्ञाने न पुनरावर्तते, **"ब्रह्मविद्ब्रह्मैव भवति"**[6] इति।

**• अद्वैतमते सृष्टेः प्रयोजनम् -**

सृष्टिश्रुतेः प्रयोजनविषये उच्यते।प्रत्यक्षादिसिद्धप्रपञ्चस्य ब्रह्मण्येवोत्पत्तिविनाशकतया अन्यत्राभावमुपवर्ण्य, तत्रापि प्रतिषिध्य, मिथ्यात्वापादनेन प्रमाणान्तरा विरूद्धतया अद्वितीयब्रह्मस्वरूपसिद्धिः प्रयोजनम्, तेनैकवाक्यत्वम्, अन्यथा शेषिविरोधात्। सृष्ट्याभासत्वाद्रजताभासवत् तज्ज्ञानस्याप्रामाण्यमिति चेत्, न, सत्यरजतवन्मुख्यसृष्ट्यन्तराभावात्, तस्या एव मुख्यसृष्टित्वात् तज्ज्ञनवत् प्रामाण्यात्। 'देवदत्तौ व्याघ्रोऽभवत्' "माया ह्येषा मया सृष्टे" त्यादौ मिध्याकार्येऽपि तद्भावसृष्टिशब्दयोः श्रवणात्। कुतः पुनः सत्यमिथ्यासाधारण्यां सृष्टौ मिथ्यात्वे पक्षपातः । **"नासदासीन्नो सदासीत्तम् आसीत् "**[7]", "मायां तु प्रकृतिमि "त्यादौ यागस्याव्यवहृततपरं न भवति। अतः स्वर्गादे: कारणत्वं यागे न गच्छति। एतदर्थमपूर्व कल्प्यते चेत् प्रकृते ज्ञानमज्ञाननाशकम् इति लौकिकनियमः अज्ञानात्मकतायाः कल्पकः। अतः बन्धस्यापारमार्थिकत्वमेवावशिष्यते । अतः सूत्रेण बन्धस्य ज्ञानेन निवृत्तिः सूच्यते ।

अत्र पुनः शङ्का स्यात् बन्धः अविद्यात्मक इति सूत्रकारस्याभिमतं चेत् स्वमुखत एव वक्तव्यं, कृत्स्नशास्त्रारम्भसमर्पकत्वात्। अत्र एवमुच्यते - तस्य **"तद्गुणसारत्वात्"**[8] इति सूत्रे स्पष्टरूपेण स्वमुखतः प्रतिपादितमिति ।

**• अद्वैतिनां मते दुःखस्वरूपम् -**

विरुद्धस्वभावयोरेकस्य सत्त्वे एव अपरस्य यथायथं भानं जायते। यथा तमसः कृते प्रकाशस्य, तथैव दुःखस्य कृते सुखस्य। सुखानुयायिनः सर्वे जनाः। दुःखं न कोऽपि इच्छति। यद्यपि सुखं दुःखञ्च परस्परपरिपूरकं तथापि जनाः सुखमात्रमिच्छन्ति। दुःखनिवृत्त्यर्थं जीवः किमपि कर्तुं शक्नोति। अस्य दुःखसागरस्य तरणार्थं केचन सन्न्यासमार्गं परिपालयन्ति। अधुना प्रश्नः स्यात्, दुःखं नाम किम्? तस्य स्वरूपं वा कथं स्यात् इति चेदुच्यते दुःखं नाम किं, दुःखस्य स्वरूपं कथम् एतेषां विषये स्वानुभव एव प्रमाणम्। दुःखमननुभूतवन्तः जनाः लोके न सन्ति। तथापि दर्शनशास्त्रम् अस्य स्वरूपं शब्दचातुर्येण प्रतिपादयितुं प्रयतते। व्याकरणदृष्ट्या अस्य स्वरूपमस्ति - दुःख इत्यस्माद्धातोः अच् प्रत्यये कृते सति दुःखशब्दः निष्पद्यते। स च दुःखशब्दः क्लीबलिङ्गे विद्यते। न्यायमते तु -

**आत्मधर्मभेदबुद्ध्यादिषद्धं संख्यादिपञ्चकं भावना तथा।**
**धर्माधर्मौ गुणा एते आत्मनः स्युश्चतुर्दश ॥**[9]

अधर्मजन्यं दुःखं स्यात् प्रतिकूलं सचेतसाम्। अधर्मत्वेन दुःखत्वेन कार्यकारणभावः। प्रतिकूलं दुःखत्वज्ञानादेव सर्वेषां स्वाभाविकविषयः प्रतिकूलमित्यर्थः। **"इच्छाद्वेषप्रयत्न-सुखज्ञानान्यात्मनो लिङ्गम्"**[10] इति।

**• अद्वैतवेदान्तमते दुःखम् -**

वेदान्ते दुःखस्वरूपमिदमिति यद्यपि न कुत्रापि वर्णितं, तथापि शब्दस्य प्रयोगः गीतायां ब्रह्मसूत्रे एवं च अन्यवेदान्तादिग्रन्थेषु च प्राप्यते। वास्तविकरूपेण दुःखं नाम अविद्या एव। यद्यपि अविद्यायाः कार्य दुःखं तथापि अविद्यादुःखयोः कार्यकारणयोः अभेदेन व्यवहारः दृश्यते। तस्याः अविद्यायाः स्वरूपं किमिति जिज्ञासायां ग्रन्थेषु प्राप्यते यत् **"सदसभ्द्यामनिर्वचनीयं त्रिगुणात्माकं ज्ञानविरोधि भावरूपं यत्किञ्चिद्"**[11] इति। वेदान्तग्रन्थेषु आचार्यैः मायाविद्ययोरभेदः प्रतिपादितः। मायाशब्दः प्रथमतया ऋक्संहितायां दरीदृश्यते। स्कन्दस्वामिवेङ्कटमाधवमुगलसायणाचार्यकृतभाष्येषु सर्वत्र मायाशब्दः प्रज्ञानमितिरूपेण उपलभ्यते। प्रज्ञा इति यास्कमुनिरपि मायां जगाद। व्युत्पत्तिश्चेत्थं प्राप्यते यत् प्रकृष्टमज्ञानमिति प्रज्ञा इति। मुद्गलभाष्ये मायाशब्दः कपटता इत्यस्मिन्नर्थे उपलभ्यते। एकैव देवता बहुरूपतां गृह्णाति। अनेकरूपत्वे अविद्या एव कारणम्। इयमविद्या देवादीन् व्यामोहयति। मोहयति इति माया। मोहहेतुः माया इति। उपनिषत्सु अव्यक्तम-

**हंसः श्वेतो बकः श्वेतः को भेदो बकहंसयोः।**
**नीरक्षीरविभागे तु हंसो हंसो बको बकः ॥" इति।**

अतः उपर्युक्ताः दृष्टान्ताः न तु जीवब्रह्मक्यप्रतिपादनपरमपि तु सारूप्यप्राप्तिमेव वदन्ति येन विशिष्टाद्वैतमतं सुप्रसिद्धं भवति।

**• अद्वैतवेदान्ते मुक्तेः साधनानि –**

येन मनसः एकाग्रता सिद्धति तदेव करणीयम्। एतदर्थं मार्गदर्शनं क्रियते विद्वद्भिः विभिन्नप्रकारैः। मोक्षसाधनत्वेन प्रकरद्वयस्योल्लेखो दृश्यते। १. बहिरङ्गः २. अन्तरङ्गश्च। बहिरङ्गसाधनं साधनचतुष्टयमपि कथ्यते। वेदान्तपरिभाषायामुक्तं यत् साधनचतुष्टयसम्पन्नः प्रमाता अधिकारी। अत्र कानि कियन्ति च साधनानि? साधनानि तु चत्वारि नित्यानित्यवस्तुविवेकविचारः, ऐहिकामुष्मिकोभयफलभोगविरतिः, शमदमोपरतितितिक्षासमाधानश्रद्धाभिः सम्पन्नता, मोक्षेच्छा च।

**1.नित्यानित्यवस्तुविवेकः** - एकं ब्रह्म एव नित्यम्, तदितरत्सर्वमनित्यमिति विवेचनम्। तदेवोच्यते -**"नित्यं विभुं सर्वगतं सुसूक्ष्मम् "**[12] इति। **"आकाशवत्सर्वगतश्च नित्यः"**[13] इति च।

**2.इहामुत्रार्थफलभोगविरागः** - "ऐहिकानां स्रक्चन्दनवनितादिविषयभोगानां कर्मजन्यतयाऽनित्यत्ववदामुष्मिकाणाम्[14] अप्यमृतादिविषयभोगानामनित्यतया तेभ्यो नितरां विरतिरिहामुत्रार्थफलभोगविरागः" इति।

**3.शमादिषड्कम्-** शमादयस्तु शमदमोपरतितितिक्षासमाधानश्रद्धाख्याः इति।

**i)शमः** - "शमस्तावच्छ्रवणादिव्यतिरिक्तविषयेभ्यो मनसो निग्रहः"[15] इति ।

**ii) दमः** - "बाह्येन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्तनम्"[16] इति ।

**iii)उपरतिः** - "निवर्तितानामेतेषां तद्व्यतिरिक्तविषयेभ्य उपरमणमुपरतिः अथवा विहितानां कर्मणां विधिना परित्यागः"[17] इति।

**iv) तितिक्षा** - "शीतोष्णादिद्वन्द्वसहिष्णुता"[18] इति।

**v) समाधानम्** - "निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः समाधानम्"[19] इति ।

**vi) श्रद्धा** - गुरूपदिष्टवेदान्तवाक्येषु विश्वासः, न केवलं विश्वासः अपितु निश्चिता बुद्धिः श्रद्धा।

**4.मुमुक्षुत्वम्** - ज्ञानेनाज्ञानमपसार्य ब्रह्मरूपावस्थितिः मोक्षः। मोक्षस्याकाक्षैव मुमुक्षत्वम्, मोक्षेच्छा वा।

अन्तरङ्गसाधनमपि चतुः प्रकारकम्। श्रवणमनननिदिध्यासनसमाधयः। समस्तोपाधिरहितस्य प्रत्यगभिन्नपरमानन्दचिद्रूपस्य ब्रह्मणः साक्षात्कारपर्यन्तं एतेषां साधनानामपेक्षा भवति।

**1.श्रवणम्** - ब्रह्मात्मनोः एकत्वनिश्चायकैः उपक्रमोपसंहाराभ्यासापूर्वताफलार्थवादोपपत्तिसंज्ञकैः षड्लिङ्गैः सर्वेषां वेदन्तसूत्रवाक्यानाम् अद्वैतब्रह्मणि निश्चयीकरणं श्रवणमिति।

**2.मननम्** - "श्रुतस्याद्वितीयवस्तुनो वेदान्तानुगुणयुक्तिभिः अनवरतम् "[20]युक्त अनुचिन्तनम् इति। विद्यारण्यमुनिना मननस्य लक्षणमेवमुक्तं – "युक्तं सम्भावितितत्वानुसन्धानं मननं तु तत्।"

**3.निदिध्यासनम्** -

"विजातीयदेहादिप्रत्ययरहिताद्वितीयवस्तुसजातीयप्रत्ययप्रवाहो निदिध्यासनम्"[21] इति। पञ्चदशीकारेणापि उक्तम् -

**ताभ्यां निर्विचिकित्सेऽर्थे चेतसः स्थापितस्य यत्।**
**एकतानत्वमेतद्धि निदिध्यासनमुच्यते[22]॥ इति।**

**4.समाधिः -** ज्ञेये चित्तैकाग्रता समाधिः। समाधिश्च द्विविधः सम्प्रज्ञातः असम्मज्ञातश्चेति।

सविकल्पकसमाधिदशायां ज्ञातृज्ञानज्ञेयानां भेदज्ञानपूर्वकं अद्वितीय-ब्रह्मणि **'अहं ब्रह्मास्मि'** तदाकाराकारितायाः चित्तवृत्तेः अवस्थानं भवति। वस्तुतः सविकल्पकसमाधिकाले मृत्तिकामयगजादिभानेऽपि सत्यं मृत्तिकाभानं भवति, एवमेव ब्रह्मजीवात्मकद्वैतभानेऽपि वाचारम्भणमात्रत्वादु अद्वैतं वस्तु भासते।

निर्विकल्पकस्तु "ज्ञातृज्ञानादिविकल्पलयापेकषयाऽद्वितीयवस्तुनि तदाकाराकारितायाः चित्तवृत्तेरतितरामेकीभावेनावस्थानम्"[23] इति। निर्विकल्पसमाधौ अष्टाङ्गानि सन्ति। यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधयः इति। योगसूत्रे उच्यते "यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि"[24] इति।

**1.यमः -** "अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाः यमाः" इति।

**2.नियमाः -** "शौचसन्तोषतपः स्वाध्यायेश्वरप्रणिधानानि" इति।

**3.आसनानि -** "करचरणादिसंस्थानविशेषलक्षणानि पद्मस्वस्तिका-दीन्यासनानि" इति।

**4.प्राणायामाः -** "रेचकपूरककुम्भकलक्षणाः प्राणनिग्रहोपायाः प्राणायामाः" इति।

**5.प्रत्याहारः -** "इन्द्रियाणां स्वस्वविषयेभ्यः प्रत्याहरणं प्रत्याहारः" इति।

**6.धारणा -** "अद्वितीयवस्तुन्यन्तरिन्द्रियधारणं धारणा" इति।

**7.ध्यानम् -** "तत्राद्वितीयवस्तुनि विच्छिद्य विच्छिद्यान्तरिन्दिरय-वृत्तिप्रवाहो ध्यानम्" इति।

**8.समाधिः -** "समाधिस्तूक्तः सविकल्पक एव" इति।

श्रेयांसि बहुविघ्नानीति बाह्यविघ्नाः सर्वत्र सम्भवन्ति, अष्टाङ्गपुष्टे निर्विकल्पसमाधौ विघ्नचतुष्टयस्य नामोल्लेखो दृश्यते। लयः, विक्षेपः, कषायः, रसास्वादः चेति।

**1.लयः -** आलस्यवशात् चित्तवृत्तिः शब्दरूपादिबाह्यविषयेषु भ्रमति फलतः खण्डवस्तुब्रह्मणः प्रत्यगात्मस्वरूपं नावभासते, नितरां निद्रा जायते, एषा स्थितिः लयः।

**2.विक्षेपः -** अखण्डवस्त्ववलम्बनेऽसमर्थः चित्तवृत्तिः बाह्यवस्तुग्रहणे प्रवर्तते, एष विक्षेपः।

**3.कषायः -** उभयोः लयविक्षेपविघ्नयोः अभावेऽपि समुत्पन्नरागा-दिवशात् स्तब्धीभावमापन्ना चित्तवृत्तिः अद्वितीयवस्तुनः अखण्डब्रह्मणः वा अवलम्बनेऽसमर्था भवति, एष कषायविघ्नः।

**4.रसास्वादः**-अखण्डवस्तुब्रह्मणोऽवलम्बनं विना चित्तवृत्तिः ब्रह्मानन्द-भ्रमेण सविकल्पकसमाधिगतानन्दमनुभवति, एषः रसास्वादः। अथवा निर्विकल्पकसमाध्यारम्भकाले सविकल्पकसमाध्या-नन्दस्यास्वादनं रसास्वादः।

एवं लय-विक्षेप-कषाय-रसास्वादाख्यविघ्नचतुष्टयरहिता चित्तवृत्तिः यदा वायुरहितस्थानस्थितदीपवद् निश्चला सती अखण्डचैतन्यं ब्रह्म अनुभवति, सैवास्याः निर्विकल्पक-समाध्यवस्थेति ज्ञेयम्। यथोक्तम् –

लये सम्बोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः।
सकषायं विजानीयात्समप्राप्तं न चालयेत्॥
नास्वादयेद्रसं तत्र निःसङ्गः प्रज्ञया भवेत्।[25] इति।

"यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता।"[26] इति च।

- **मुक्तेः प्रकाराः-**
- **विशिष्टाद्वैतिनां मते मुक्तेः प्रकाराः -**

रामानुजमते मुक्तेः प्रकाराः दृश्यन्ते। अस्मिन्मते यद्यपि मतवैषम्यमस्ति तथापि अत्र पञ्च प्रकाराः उल्लिख्यन्ते। वैकुण्ठे पञ्चविधं मुक्तिमनुभवन्ति मुक्ताः। भगवन्मतानुसारेणैव अत्र मुक्तेः प्रकारान् अङ्गीकृत्यैव उच्यते -

**"सालोक्यसाष्टि सामीप्यसारूप्यैकत्वमप्युत।**
**दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः"[27]॥ इति।**

अत्र पञ्च प्रकाराः अङ्गीक्रियन्ते। ते च सालोक्यमुक्तिः साष्टिमुक्तिः सामीप्यमुक्तिः सारूप्यमुक्तिः सायुज्यमुक्तिः इति। अस्यार्थस्तावत् अम्बुधौ गङ्गाम्भसो गतिरिति दृष्टान्तव्यञ्जितमर्थं स्पष्टयन्नुक्तलक्षणभक्तिमतां जनानां निष्कामत्वं कैमुत्यन्यायेनाह-सालोक्यं नाम भगवता सहैकस्मिन् लोके निवासः। सािष्ट समानैश्वर्यम्। सामीप्यं निकटवर्तित्वम् । सारूप्यं समानरूपत्वम्। एकत्वं सायुज्यम्। उत अपि दीयमानमपि न गृह्णन्ति कुतस्तं कामनेति भावः। मत्सेवनं विनेति केचिदगृह्णन्ति चेत्मत्सेवार्थम् एव गृह्णन्तीत्यर्थः।

मुक्तजीवः शुद्धतत्वनिर्मितदिव्यलोके निवसति। तदा तस्य शरीरमानन्दमयं भवति। मुक्तः जीवः विष्णुलोके निवसति। अत्र मुक्तजीवस्य ईश्वरसाक्षात्कारः सम्भवति ।

रामानुजाचार्यस्य मते जीवन्मुक्तिः न केवलं युक्तिविरुद्धं, श्रुतिविरुद्धमपि। यथा "तस्य तावदेव चिरं यावन्न विमक्ष्ये अथ सम्पत्स्ये" इति। सकलभेदनिवृत्तिरूपा मुक्तिः जीवतो न सम्भवति।

- **अद्वैतिनां मते मुक्तेः प्रकाराः -**

अद्वैते वस्तुतः नास्ति मुक्तेः भेदः। आचार्याणामपि अत्र मतभेदाः सन्ति। तथापि मुक्तस्य भेदद्वयं स्वीकरोति।

१.जीवन्मुक्तिः, २.विधेयमुक्तिश्चेति।

**1.जीवन्मुक्तिः –**

सम्प्रति जीवन्मुक्तं परिभाष्यते। श्रुतिभिः गुरूपदेन च जीवब्रह्मक्यज्ञानं प्राप्य आत्मगताज्ञानं विनश्यति। तदैवाखण्डन्ब्रह्मणः साक्षात्कारो भवति। अस्यां स्थित्यां मूलभूतमज्ञानं तत्कार्यभूतानि सञ्चितकर्माणि संशयविपर्ययादयश्च नश्यति। एवं अखिलबन्धनाद् विमुक्तात्मा ब्रह्ममात्रे स्थितो भवति। एवम्भूतः ब्रह्मनिष्ठसाधक एव जीवन्मुक्तः। तदेवोच्यते सदान्दद्योगिन्द्रेण वेदान्तसारे "जीवन्मुक्तो नामस्वस्वरूपा-खण्डब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वस्वरूपाखण्डब्रह्मणि साक्षात्कृते अज्ञानतत्कार्यसञ्चितकर्म संशयविपर्यादिनामपि बाधितत्त्वातदखिल-बन्धरहितो ब्रह्मनिष्ठः"[26] इति।

श्रुतिश्च - **भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।**
**क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे॥[28] इति ।**

जीन्मुक्तविवेके उच्यते "जीवतः पुरुषस्य कर्तृत्वभोक्तृत्वसुखदुः खादिलक्षणश्चित्तधर्मः क्लेशरूपत्वाद्बन्धो भवति, तस्य निवारणं जीवन्मुक्तः "[28] इति। जीवन्मुक्तस्य पर्यायशब्दाः स्थितप्रज्ञः, भगवद्भक्तः, गुणातीतः, ब्राह्मणः, अतिवर्णा च। जीवन्मुक्तस्य स्थितिरवस्था उच्यते- जीवन्मुक्तोऽयं समाधिभिन्नायां जाग्रदवस्थायां मास-रक्त-मुत्र-मलादीनां पात्रेणानेन देहेन अन्धत्व-बधिरत्व-मन्दत्व-पटुत्वादिपात्रेणानेन बाह्येन्द्रियसमूहेन, क्षुत्पिपासा-मोहशोकादिपात्रेण अनेन अन्तःकरणेन पूर्वपूर्ववासनया क्रियमाणनां प्रारब्धकर्मणाञ्च उपभुज्यमानानि फलानि अवलोकयन्नपि तात्त्विकदृष्ट्या तथैव

नावलोकयति यथा इन्द्रजालमिति ज्ञानवान् जनः तत् पश्यन्नपि परमार्थमेतदिति बुद्ध्या नैव पश्यति। मूले "स चक्षुरचक्षुरिव सकर्णोऽकर्ण इव" इति श्रुतिप्रामाण्यं प्रस्तौति यत् नेत्रवान् अपि प्रपञ्चरूपाद्यदर्शनात् नेत्रहीन इव भवति। एवमेव कर्णवान् अपि प्रपञ्चरूपाद्यश्रवणात् कर्णहीनो बधिर इति भवति। उक्तञ्च -

**सुषुप्तवज्जाग्रति यो न पश्यति द्वयं च पश्यन्नपि चाद्वयत्वतः।**
**तथा च कुर्वन्नपि निष्क्रियश्च यः स आत्मविन्नान्य इतीह निश्चयः**[29]**॥ इति।**

जीवन्मुक्तविषये वसिष्ठः रामं प्रति वदति –

**यथास्थितमिदं यस्य व्यवहारवतोऽपि च।**
**अस्तं गतं स्थितं व्योम स जीवन्मुक्त उच्यते**[30] **॥ इति ।**

आचार्यशङ्करमतानुसारेण मुक्तस्य जगदिदं तथैव नश्यति यथा अग्न्या घृतकाठिन्यम्। किन्तु मुक्तस्य भौतिकजगतः विनाशः न भवति, अपि तु जगद्बुद्धेः नाशो भवति। तत्त्वबोधावस्थायां **"ब्रह्मविद्ब्रह्मैव भवति "**[31] इति। इतोऽपि उक्तं यत् जीवन्मुक्तः सः एव यः जाग्रदवस्थायामपि सुषुप्तेः अनुभवः कुर्वन् द्वैतजगतं न पश्यति, अद्वैतमेव पश्यति।

जीवन्मुक्तः पुरुषः शरीरं त्यात्क्त्वा लोकान्तरं न गच्छति, सञ्चिकर्मणः नाशे सत्यपि प्रारब्धकर्मणः कर्मवशात् शरीरं तु चलत्येव। प्रारब्धकर्मस्य भोगे एव नाशः। यथा चक्रस्य भ्रमणबलसाम्येऽपि कियत्कालपर्यन्तं भ्रमति। यथा वा बाणः स्वलक्ष्यं प्राप्यापि किञ्चिदग्रे गच्छति। जीवन्मुक्तस्य अस्वीकारे श्रुत्योक्तः ब्रह्मनिष्ठगुरोः अभावप्रसङ्गः। अपि च गीतायां भगवता श्रीकृष्णेनोक्तं स्थितप्रज्ञलक्षणमेव वृथा स्यात्। सुरेश्वराचार्यस्य मतमस्ति यत् यथा निद्राभग्ने जाते स्वप्नदृष्टपदार्थानां भानं न भवति तथा मुक्तस्य जगतः भानं न जायते। जीवन्मुक्तिविषये विद्यारण्यस्वामिनः मतमिदं विद्यया अविद्यायाः नाशेऽपि तत्र अविद्यासंस्कारवशात् देहेन्द्रियाणामवस्थानं सम्भवति। यथा पुष्पं पुष्पपात्रात् स्वीकारेऽपि पुष्पपात्रे किञ्चित्कालं यथा गन्धसंस्कारः तिष्ठति तथैव अविद्यानिवृत्तेऽपि संस्कारवशात् शरीरं किञ्चित्कालं तिष्ठति[32]। अस्मिन्विषये चित्सुखाचार्यस्य मतमिदम् तत्त्वज्ञानोदये एव अविद्यालयः न भवति, प्रवलाविद्यावशात् ज्ञानं प्रतिबद्धं भवति।

अत्र शंका स्यात् जीवन्मुक्तौ अविद्यालेशस्य अनुवृत्ति स्वीकारे वास्तविकमुक्तिः असम्भव एव, इत्यस्मिन्विषये मधुसूदनसरस्वतीना उच्यते जीवन्मुक्त्यावस्थायां अविद्यायाः आवरणशक्त्याः नाशो जायते। किन्तु विक्षेपशक्त्या प्रारब्धकर्म तिष्ठति। भामतीकारेणापि जावन्मुक्तिं समर्थितवान्।

स्थितप्रज्ञविषये गीतायां "स्थितप्रज्ञस्य का भाषा" इति अर्जुनप्रश्नस्य भगवताश्रीकृष्णेन प्रत्युत्तरति यत् -

**प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान्।**
**आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥**
**दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।**
**वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते**[33]**॥ इति ।**

अर्थात् यदा कामादिन् यः त्यक्तवान् अपि तु अत्मन्येव सन्तुष्टः यः, किञ्च सुखे दुःखे यस्य विकारो नास्ति। भयक्रोधादिरहितः यस्य सकासे सर्व समानमति भानं भवति, सः एव स्थितप्रज्ञः। यः शुशाशुभं प्राप्य न कमपि अभिनन्दति नापि द्वेष्टि सः स्थितप्रज्ञलक्षमित्यादिप्रकारेण स्थितप्रज्ञस्य लक्षणं गीतायां विस्तरेण प्रोक्तमस्ति।

- **विधेयमुक्तिः -** ज्ञाने सति अज्ञाननाशे मुक्तो भवति। मुक्तोऽपि प्रारब्धकर्मवशा कर्मनाशपर्यन्तं शरीरं धारयति। प्रारब्धः कर्मक्षये मुक्तिः। सा एव विधेयमुक्तिः। तदेवोच्यते –

**जीवन्मुक्तपदं त्यक्त्वा स्वदेहे कालसात्कृता।**
**विशत्यदेहमुक्तत्वं पवनोऽस्पन्दतामिव ।।**
**विदेहमुक्तो नोदेति नास्तमेति न च नेतरः।**
**न सन्नासन्न दूरस्थो न चाहं न च नेतरः।।**[34]

यथा वायुः कदाचिच्चलनं त्यक्त्वा निश्चलरूपेणावतिष्ठते तथा मुक्तोऽत्मा अप्यपादिकृतसंसारं त्यक्त्वा स्वरूपेणावतिष्ठति। मुक्तपुरुषस्य स्वरूपविषये उच्यते - "यो नस्तद्वेद तद्वेद नो न वेदेति वेद च"[35] । अपि च "यस्यामतं तस्य मतं यस्य न वेद सः अविज्ञातं विजानतां विज्ञानमविजानताम्"[36] इति। एवं तत्त्वज्ञाने जाते, अविद्यानाशे सति, सर्वबन्धनराहित्ये सति, ऋते कर्मलेशे शाश्वतब्रह्मक्यभावमनुभवति, तदैक्यं वा प्राप्नोति। **"ब्रह्मविद्ब्रह्मैव भवति"**[37] इति श्रुतिप्रमाणात्।

अतः विशेष्यविशेषणभावः नैव सम्भवति। किन्तु अस्माकं मते तु एकम् एव ब्रह्म रूपद्वयेन आविर्भवति। अतः तत्त्वंपदयोः सामानाधिकरण्येऽपि तत्त्वमसि इति वाक्यमज्ञानं न निवर्तयति। वाक्यस्य तु एषः एव अर्थः एकम् एव ब्रह्म रूपद्वयेन तिष्ठति। जीवः शरीरः ईश्वरस्तु तस्य आत्मा। आत्मशरीरयोः भेदस्तु सुतरां सिद्धम्। किन्तु उभयोः तादात्म्यं सम्भवति अपृथक्सिद्धविशेषणत्वात्। अतः तत्त्वमस्यादिमहावाक्यज्ञानं न अज्ञाननिवर्तकम्।

- **अद्वैतवेदान्ते मोक्षस्वरूपम् -**

अद्वैतवेदान्ते ब्रह्म एकमेवाद्वितीयं **-"सत्यं ज्ञानमनन्तं ब्रह्म"**[38] इति। **"ब्रह्म सत्यं जगन्मिथ्या"**[39] इत्यादिश्रुतिप्रमाणाद्ब्रह्मैव सत्यमन्यत्सर्व मिथ्यैव। तस्मात् स्वस्वरूपं ब्रह्मप्राप्तिः अवश्यं कर्तव्यमेव। मुक्तेः प्रकारद्वयं विद्यते सद्योमुक्तिः क्रममुक्तिश्चेति। क्रममुक्तिरेव जीवन्मुक्तिरित्युच्यते। निर्गुणब्रह्मोपासकानां **"अहं ब्रह्मास्मि"**[40] इत्येवं रूपेण स्वकण्ठस्थमालां प्राप्त इव ब्रह्मरूपं प्राप्तिः सा सद्योमुक्तिः। किञ्च सगुणब्रह्मोपासकानां क्रममुक्तिः अवान्तरमुक्तिर्वा सम्भवति। ब्रह्मलोके ऐश्वर्यभोगानन्तरं कल्पान्ते सद्योमुक्तिः सम्भवति। अस्य सम्प्रदायस्य प्रवर्तकाः अस्य सम्प्रदायस्य प्रवर्तकाः शङ्कराचार्याः। अत्राधिकारी तु साधनचतुष्टयसम्पन्नः तस्य पूर्वमीमांसायां ज्ञानमस्तु वा। ब्रह्मणः लक्षणं तु **"जन्माद्यस्य यतः"** इति।

शङ्कराचार्या मुक्तेः स्वरूपविषये कथयन्ति - मुक्तिः पारमार्थिकः, कूटस्थः, नित्यः, आकाशवद्, सर्वक्रियारहितः, नित्यतृप्तः, निरवयवः, स्वयंज्योतिःस्वभावः। आचार्याणां मतानुसारेण मोक्षावस्थायां सुखदुःखयोः साकं मुक्तस्य सम्बन्धः नास्ति। तदेवोच्यते -"इदं तु पारमार्थिकं कूटस्थं नित्यं व्योमवत, सर्वव्यापि सर्वविक्रियारहितं नित्यतृप्तं निरवयवं स्वयंज्योतिस्वभावम्। यत्र धर्माधर्मौ सहकार्येण कालत्रयं च नोपावर्तेते। तदेतदशरीरत्वं मोक्षाख्यम्। "[41] आत्मा शुद्धचैतन्यः अखण्डः आनन्दस्वरूपः। आत्मानुभवः मोक्षः। **"ब्रह्मविद्ब्रह्मैव भवति"**[42] इति श्रुत्यनुसारेण ब्रह्मज्ञानिनोः नास्ति भेदः। अविद्यानिवृत्तिरेव मोक्षः, तदेवोच्यते - "अविद्यापगमयात्रत्वात् ब्रह्मप्राप्तिफलस्य "[43] "फलञ्च मोक्षोऽविद्या-निवृत्तिर्वा "[44]। परमानन्दप्राप्तिः मोक्षः इति चित्सुखाचार्यः। तेदवोच्यते "अनवच्छिन्नानन्दप्राप्तिः मोक्षः" इति। ब्रह्मसाक्षात्कारः अविद्यानिवृत्तिः

प्रपञ्चविलयश्च सर्वे मोक्षस्यैव समार्थकशब्दः। अत्र कार्यान्तरं किमपि नैव चिन्तनीयम्। शब्दवैचित्रमेव अत्र प्रदर्यते। अविद्यानिवृत्तेः फलं तु अविद्यानिवृत्तिः, तदेवोच्यते - "मोक्षप्रतिबन्धनिवृत्तिमात्रमेव आत्मज्ञानस्य फलम् "[45] इति।

- **शङ्कराचार्येभ्यः पूर्वाचार्याणामभिप्रायः -**

शङ्करात्प्रागपि अद्वैतमतस्य प्रचलनमासीत्। शङ्कराचार्यैः अद्वैतमतं सुदृढतया संस्थापितम्। ब्रह्मसूत्रे प्राक्तनानाम् आचार्याणां मतं प्राप्यते। ते च बादरिः काशकृत्स्नः औडुलोमिः आश्मरथ्यः भर्तृहरिः इत्यादयः। एतेषां मते मोक्षस्य स्वरूपमालोच्यते –

- **बादरिः –**

"स एनान् ब्रह्म गमयति"[46] इत्यत्र ब्रह्मशब्दस्यार्थः बाद्ररिणा कार्यब्रह्मपरकतया स्वीक्रियते। अस्य मतानुरेण ब्रह्मपदेन अत्र परब्रह्मणः ग्रहणं नैव करणीयम्। अत्र कार्यब्रह्मणः एव ग्रहणं भवति। यतो हि गन्तागन्तव्यादि कार्यब्रह्मणि एव दृश्यते। अतः श्रुतस्य ब्रह्मशब्दस्य कार्यब्रह्मपरकतया एव व्याख्या कृता। छान्दग्योपनिषदि मुक्तपुरुषस्य वर्णनप्रसङ्गे उच्यते "संकल्पादेवास्य पितरः समुत्तिष्ठन्ति"[47] इति। अर्थात् मुक्तस्य सङ्कल्पे पितृगणाः उत्तिष्ठन्ति । अत्र एवं संशयः भवति यत् ईश्वरभावापन्नपुरुषस्य शरीरं इन्द्रियाणि तिष्ठन्ति न वा। अत्र बादरिना उच्यते ईश्वरभावापन्नपुरुषस्य शरीरं तथा इन्द्रियाणि न तिष्ठन्ति। अतः छान्दग्ये उच्यते - **"मनसा एतान् कामान् पश्यन्। "**[48] एतेन वक्तुं शक्यते आचार्यः बादरिः वेदान्ती।

- **काशकृत्स्नः –**

काशकृत्स्नस्य मतानुसारे जीवः न परमात्मनः विकारः। शङ्कराचार्याः मतमिदं कथयन्ति **"काशकृत्स्नस्याचार्यस्याविकृतः परमेश्वरो जीवो नान्य इति मतम् "**[49]। सूत्रकारेणापि उच्यते काशकृत्स्नस्य मते अविद्याकल्पितभेदकारणादेव ब्रह्म जीवरूपेण प्रतिभासते। तदेवोच्यते "अवस्थितेरिति काशकृत्स्नः "38 इति।

- **औडुलोमिः –**

औडुलोमिमते जीवब्रह्मणोः संसारदशायां भेदोऽस्ति । मुक्तौ तु अभेदः। भामतीकारेण भामत्यामुच्यते - "जीवो हि परमात्मनोऽत्यन्तं भिन्न एव सन् देहेन्द्रियमनोबुद्ध्युपाधानसम्पर्कात् सर्वदा कलुषः, तस्य च ज्ञानध्यानादिसाधनानुष्ठानात् संप्रसन्नस्य देहेन्द्रियादिसंघातादु उत्क्रमिष्यतः परमात्मना ऐक्योपपत्तेः इदमभेदेनोत्क्रमणम्। एतदुक्तं भवति भविष्यन्तमभेदमुपादाय भेदकालेऽपि अभेद उक्तः"[50] इति। औडुलमेः भेदाभेदसिद्धान्तस्य उल्लेखः शाङ्करभाष्ये दृश्यते – "औडुलोमिपक्षे पुनः स्पष्टभेदावस्थान्तरपेक्षौ भेदाभेदौ गम्येति"[51] ।

- **आश्मरथ्यः –**

आश्मरथ्यानुसारेण विज्ञानात्मपरमात्मनोः परस्परभेदाभेदसम्बन्धः। आश्मरथ्यस्योल्लेखः शाङ्करभाष्ये दृश्यते। ते च "आश्मरथ्यस्य तु यद्यपि जीवस्य परस्मादनन्यमभिप्रेतं तथापि प्रतिज्ञासिद्धेरिति समापेक्षत्वाभिधानात् कार्यकारणभावः कियानपि अभिप्रेत इति मन्यते।"[52] उक्तमतानुसारेण यद्यपि जीवपरमात्मनोः अभेदः तथापि यत्किचित् कार्यकारणभावः इष्टः अस्ति।

- **भर्तृहरिः** – भर्तृहरिः मुक्तेः प्रकारद्वयं स्वीकृतवान्। प्रथमस्तु अपरमोक्षः अपवर्गः,याजीवन्मुक्तिः इत्युच्यते। द्वितीयस्तु परमोक्षः ब्रह्मभावापत्तिः,या विधेयमुक्तिः इत्युच्यते। अपरमोक्षस्तु जीवस्य अस्मिन् शरीरे एव आत्मसाक्षात्कारः। अस्य विपरीतं परामुक्तिः, देहपातादु अनन्तरमेव।

- **शंकराचार्येभ्योऽनन्तराचार्याणामभिप्रायः -**

शङ्कराचार्याः यथा नवीनमौलिकोद्भावनाशक्त्या उपनिषद्दर्शनयोः मन्थनं कृत्वा अद्भुतमद्वैतरत्नं उद्भावितवन्तः तथा शङ्कराचार्यशिष्याः अन्याश्चाचार्याश्च स्वप्रतिभाबलात् सूक्ष्मपर्य-वेक्षणशक्त्या शङ्करस्य अद्वैततत्वस्य समीक्षात्मकं निरूपणं कृतवन्तः। तेषु अग्रगण्यानां विषये आलोच्येते –

- **सुरेश्वराचार्यः –**

सुरेश्वराचार्यस्य संन्यासाश्रमात् पूर्वं नाम अस्ति मण्डनमिश्रः। सुरेश्वराचार्यः शङ्कराचार्यान् समर्थयति। किन्तु केषुचित् स्थलेषु स्वमतमुद्भावयति। आभासवादसिद्धान्तः सुरेश्वराचार्यस्य प्रमुख-सिद्धान्तः। शक्यं, मलविक्षेपादिदोषरहितशमदमादिसंस्कृतमन-सैवाधिगन्तुं योग्यं, वेदान्तप्रमाणजनिता-खण्डाकारान्तःकरणवृत्त्या तदाकारकाज्ञाने नाशिते स्वयंज्योतिष्ट्वात्स्वयमेव प्रकाशमानं ब्रह्म।

- **जीवन्मुक्तिविदेहमुक्तिविषये आचार्याणामभिमतम् -**

शंकराचार्यपरवर्त्याचार्याणां मतम् आलोच्यते। सर्वज्ञात्ममुनिः जीवन्मुक्ति नैवाङ्गीकरोति। ज्ञानोदये सति ज्ञानप्रतिबन्धकाज्ञानस्य लेशमपि नानुवर्तते। अतः जीवन्मुक्तिपरकश्रवणादिश्रुतीनाम् अर्थवादपरकतया ग्रहणं भवति, शास्त्रस्य जीवन्मुक्तस्य प्रतिपादने प्रयोजनाभावात्। येन निदिध्यासनं कृतं तस्य ब्रह्मज्ञानोदये सति वासनया साकमविद्यायाः लयः भवति। शङ्कराचार्यस्य सर्वज्ञात्ममुनेश्च मध्ये एकत्र साम्यमस्ति। उभयोः मते ब्रह्मसाक्षात्कारादु अनन्तरमविद्यालेशः नैव तिष्ठति। शङ्करमतानुसारेण ब्रह्म अखण्डम् अनन्तप्रकाशसम्पन्नम्।[53]

विद्यारण्यस्वामिना अविद्यानिराकरणेन जीवन्मुक्तेः असङ्गतायाः निराकरणार्थमुच्यते-तत्त्वसाक्षात्कारेऽपि प्रारब्धकर्मनाशावधि अविद्या-लेशानुवृत्त्यनुभवात् जीवन्मुक्तिः सिध्यति। तत्वसाक्षात्कारसत्वेऽपि अविद्यालेशसत्वात् जीवन्मुक्तिः सिध्यति। मतमिदं शङ्कराचार्य-मताद्भिन्नः।

मण्डनमिश्रेण जीवन्मुक्तिसम्बन्धे विरुद्धमतद्वयं विचार्यते - जीवन्मुक्तस्य निराकरणार्थं एकत्र सद्यमुक्तेः समर्थनं कृतम्, अन्यत्र च जीवन्मुक्तेः प्रतिपादनमपि कृतम्। सद्योमुक्तेः समर्थनपरकं मण्डनमिश्रस्य कथनं ब्रह्मसाक्षात्कारे सति प्राणिनां सञ्चित-सञ्चीयमानप्रारब्धकर्माणामेव नाशो भवति। समस्तकर्मक्षये जीवस्य देहपातो जायते ततः विदेहकैवल्यं प्राप्नोति। अस्य प्रामाण्यरूपेण श्रुतिप्रमाणमुच्यते "क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे।" इति। तथा श्रुतिप्रमाणमुच्यते" ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा इति वाक्यानुसारेण ब्रह्मज्ञानप्राप्ते सति सर्वाणि कर्माणि नश्यन्ति। सदानन्दप्रभृतिः शङ्करपरवर्त्याचार्यणः अपि मतमिदं समर्थयन्ति। ब्रह्मसाक्षात्कारानन्तरं जीवन्मुक्तः प्रारब्धकर्मवशात् कर्मक्षयपर्यन्तं जीवति।

- **उपसंहारः –**

मोक्ष एव परमपुरुषार्थत्वेन सर्वैः दार्शनिकैः स्वीक्रियते। वेदान्तशास्त्राणामपि परमं प्रयोजनं स्वमलिनावरणपरित्यागेन शुद्धानिर्वचनीयस्वस्वरूपज्ञानोद्भावनम्। आदौ, उपद्घातादनन्तरं समान्यपरिचयः, तत्त्वज्ञानं, अद्वैतवेदान्तस्य सामान्यपरिचयः, सृष्टेः प्रयोजनं, जगन्मिथ्यात्वं, जगतः स्वरूपं चेति प्रभृतयः विषयाः विवेचिताः। अद्वैतानुसारेण बन्धः, दुःखस्वरूपं, तत्त्वज्ञानस्य जनकं,

तत्त्वमस्यादि-वाक्यर्थविचार इत्यादयः विषयाः विवेचिताः। तत्र अविद्या-मुक्ति-मुक्तिप्राकारादीनां विषये आलोचना कृता। रामानुजाचार्याणां शङ्कराचार्याणां च मतानुसारेण मोक्षस्वरूपं संक्षेपेणाभिहितम्। अन्ते उपसंहारः सुप्रतिस्थापितः।

यद्यपि बहवः ग्रन्थाः अस्मिन्विषये वर्तन्ते, तथापि मोक्षविषये अभितमेकत्र संकलनं परिशीलनञ्च कुत्रापि प्रायः न भवेत्। अतः एतेषामेकत्र संरक्षणाय जिगमिषाणां जिज्ञासोपशमनाय मया यथाशक्तिः यतामतिः परिशीलनं क्रियते।

**सन्दर्भग्रन्थसूची -**


संस्कृतपुस्तकानि - अद्वैतसिद्धिः (संस्क. प्रथमः), श्रीदक्षिणामूर्ति संस्कृत ग्रन्थमाला, २००५।

अप्पय्यदीक्षितः, सिद्धान्तलेशसंग्रहः. (पारेसनाथद्विवेदी, सं.१), सम्पूर्णान्द-संस्कृत-विश्वविद्यालयः, वाराणसी, २००५।

ईशादि नौ उपनिषद्, गीता प्रेस, गोरखपुर। ईशाद्यष्टोपनिषद्भाष्यम्, व.न. कृष्णमाचार्य, भारद्वादजरामानुजाचार्यविरचिता, विवेककला-निधिप्रेस, मद्रास, १९६८।

ईशावास्योपनिषद्, चौखाम्बा स.प्र., वाराणसी, १९९५।

एम्.वि. सुब्रह्मण्यशास्त्री (सं.तू), सिद्धान्तसिन्धुः, राष्ट्रियसंस्कृतविद्या-पीठम्, तिरूपतिः, २०१०।

जगदीशशास्त्री (सं. प्र.), उपनिषत् संग्रहः, मोतीलालवेनारसीदाशः, देहली, १९८४।

दीनेशशास्त्री, पञ्चदशी, चौखाम्बा प्रकाशन्, वाराणसी, १९७०।

नारायणाचार्यः, अद्वैतसिद्धिः, गीताप्रेस, गोरखपुर, १९८१।

पञ्चदशी, चौखाम्बा विद्याभवन, वाराणसी, २००८।

विवरणाचार्यः, पञ्चपादिका (संस्क. प्रथमः), राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, १९९५।

शङ्कराचार्यः, ब्रह्मसूत्रशाङ्करभाष्यम् (परिमलो कल्पतरु भामती टिका सहित). (श्रीमदनन्तकृष्णशास्त्रिः, सं.प्र.), कृष्णदास अकादमी, वाराणसी, २०००।

स्वामी वाणेशानन्द, पञ्चदशी, उद्बोधनकार्यालय, वेलुड मठ, कोलकाता, २००५।

व्यानार्जी दीपकदास, छान्दोग्योपनिषद्, देशप्रकाशन, कोलकाता, १९९०।

वि. पालः, वेदान्तसारः, संस्कृतपुस्तकभाण्डारः, कोलकाता, २०११।

शास्त्री श्रीरवीन्द्रनाथ, वेदान्तदर्शनरहस्य, संस्कृतपुस्तकभाण्डार, कोलकाता, १ संस्करणं, २०१०।

ब्रह्मचारी मेधाचैतन्य, वेदान्तसारेर तिनटि टिकार विशद वङ्गानुवाद, दण्डिस्वामी दामोदर आश्रम, कलकाता, १४९६।

सांख्यवेदान्ततीर्थः, पण्डित दुर्गाचरण, वेदान्तदर्शनम् (प्रथम, द्वितीय, तृतीय भागः), देवसाहित्यकुटीर, कोलकाता, २०१०।


**सन्दर्भ**

1. तैत्तिरीयोपनिशत् 1.11
2. ब्रह्मसूत्रशंकरभाष्य – 1.1.4
3. मुण्डकोपनिशत् 3.2.9
4. नासदीयसूक्त.1
5. ब्रह्मसूत्र.2.3.29
6. वेदान्तसारः.
7. गौतम् सूत्र. 3.2.5.
8. वेदान्तसारः.
9. मुण्डकोपनिशत्. 1.6
10. छान्दोग्योपनिषत्. 3.14.3
11. वेदान्तसारः
12. वेदान्तसारः
13. वेदान्तसारः
14. वेदान्तसारः
15. वेदान्तसारः
16. वेदान्तसारः
17. वेदान्तसारः
18. वेदान्तसारः
19. आ.उ.34
20. वेदान्तसारः
21. वेदान्तसारः
22. माण्डुक्यकारिका 3. 44-45
23. गीता 6.19
24. श्रीमद्भागवत्पुराणम् 3.29.16
25. वेदान्तसारः
26. मुण्डकोपनिषत् 2.2.8
27. जीवनमुक्तविवेकः. पृ. 21
28. उपदेशसाहस्री. 5
29. श्री. रामायणम्
30. बृहदारण्यकोपनिशत्. 4.4.25
31. विवरणप्रमेयसारसंग्रहः. पृ. 360
32. गीता. 55-56
33. जीवन्मुक्तिविवेकः. पृ.41
34. केनोपनिषत्. 2.2
35. केनोपनिषत्.2.3
36. मुण्डकोपनिषत्. 3.2.9
37. तैत्तिरीयोपनिषत्. 2.1
38. तैत्तिरीयोपनिषत्.
39. बृहदारण्यक. 1.4.10
40. ब्रह्मसूत्रशंकरभाष्य. 1.1.4
41. मुण्डकोपनिषत्.3.2.9
42. बृहदारण्यकोपनिषत् शंकरभाष्य 1.4.10
43. बृहदारण्यकोपनिषत् शंकरभाष्य. 1.4.7
44. शांकरभाय़ष्य. 1.1.4
45. छान्दोग्योपनिषत्.4.15.5
46. छान्दोग्योपनिषत्. 8.2.1
47. छान्दोग्योपनिषत्. 8.12.15
48. ब्रह्मसूत्रभाष्य. 1.4.22
49. भामती
50. ब्रह्मसूत्रशंकरभाष्य.1.4.22
51. ब्रह्मसूत्र भाष्य.1.4.22
52. ब्रह्मसूत्रशंकरभाष्य. 3.5.52
53. ब्रह्मसिद्धिः.पृ. 130